वज्रसूचीयं

लेखक - श्री शंकराचार्य

पेज = 4

= 25×11×0.1 c.m.

= पूर्ण

ओंम स्वास्ति श्री गणेशाय नमः ओं नमः परमात्मने चित्सदानंद ... ...

इति श्री शंकराचार्य विरचितं वज्र सूचीयं समाप्तम

२ ॐ स्वस्ति श्री गणेशाय नमः ॐ नमः परमात्मने चित्सदानंदरूपाय सर्वधीवृत्तिसाक्षिणे नमो वे
दांतवेद्याय ब्रह्मणेनंतरूपिणे १ वज्रसूचीं प्रवक्ष्यामि शास्त्रमज्ञानभेदनं दूषणं ज्ञानहीनानां
भूषणं ज्ञानचक्षुषां २ ब्राह्मणक्षत्रियवैश्यशूद्रा इति चत्वारो वर्णाः तेषां ब्राह्मण एव प्रधान इति वेदव
चनानुरूपं स्मृतिभिरप्युक्तं च तत्र चोद्यमस्ति को वा ब्राह्मणो नाम किं जीवः किं देहः किं जाति
किं वर्णः किं पांडित्यं किं धर्मः किं धार्मिकं किं कर्मेति षष्ठो विकल्पः प्रथमं जीवो ब्राह्मण इति चेत्तन्न त
त्सर्वेषामपि जनस्य जीवस्यैकरूपत्वात् तस्मात् जीवो ब्राह्मणो न भवत्येव अन्यश्च देहो ब्राह्मण इति चे
त् तर्हि चंडालपर्यंतानां मनुष्याणां देहस्य जरामरणधर्मदर्शनात् तस्माद्देहो ब्राह्मणो न भवत्येव पितृमा
तृशरीरदहनात्पुत्राणां ब्रह्महत्यादिदोषसंभवः स्यादित्यपि हेतोर्देहो ब्राह्मणो न भवत्येव २ जातिरिति
चेत् तर्हि अन्यजातिसमुद्भवा बहवो महर्षयः संति तथाहि ऋष्यशृंगो मृग्याः कौशिकः कुशात् गौ
तमः शशपृष्ठे वाल्मीकः वल्मीकात् व्यासः कैवर्तकन्यायां माण्डव्यः मंडूकीगर्भात् पराशरो मातंगीमा
२

हितः सम्यग्मारादिसंतोषवान् मात्सर्यदंभाहंमोहादि दुःखार्थनिवृत्तः सदेकस्वरूपमुच्यते न प्राचोऽहं नन्न नान्यजायतेऽभ्र 3
२ द्रः तस्कारात् द्विजउच्यते वेदाभ्यासाद्विर्विप्रो ब्रह्म जानातिब्राह्मणः स्वान्तरेवब्रह्मविदेवब्राह्मणो नान्यइति निष्क्र
यः कर्मयोगी च विद्वांसः श्वेतरात्संस्वात्मलयं सत्यवैकुण्ठकैलासमहीराधिमेरवास्त्या १ विश्वरूपं चचैतन्य
मेतन्मायास्वरूपकं मायापंचभवेद्ब्रह्मतत्वंब्रह्मकेवलं २ योगी देहाभिमान्येव भोगी कर्मस्थितस्तरः ज्ञा
नी मुक्ताभिमान्येवतत्त्वज्ञानाभिमानतः ३ किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किं आत्मना
पूरितं सर्वं महाकल्पांबुना यथा ४ सावयवबंधज्ञानं मोक्ष इति केचित् बंधे निरावयवगुणा
तीतब्रह्मज्ञानं मोक्ष इति केचित् साकारस्य विनाशो मुक्ति निराकारस्य शून्यता उभयपक्षविहीनब
लज्ञानं मोक्ष इति केचित् एकदेशिकसिद्धान्त कथितभक्तिविधानं मोक्ष इति केचित् व्यापकसकला
गमशास्त्रार्थनिर्दिष्टाचारत्यागो मोक्ष इति केचित् एकदेशिकव्यापकमाचारनानाचारकरणवर्जितं मो
क्ष इति केचित् मनोवाक्कायादि विकल्पविच्छेदलक्षणो मोक्ष इति केचित् मनःपवनमध्येयध्यानध्या
रणाकरणो मोक्ष इति केचित् द्वयपक्षयोभयपक्षज्ञानाभावो मोक्ष इति केचित् महावाक्यविवरणो मोक्षः

मीपुत्रः पराशरश्चंडाली गर्भोद्भवः नारदो दासीपुत्रः इति पुराणेषु वसिष्ठो वेश्यायां विश्वामित्रः क्षत्रियायां
अगस्त्यः कलशात् जातः विशेषाद् ब्राह्मणत्वमत्युत्तमं स्मृ पते कृतं एतेषां जातानां विनापि संस्कृतानां त
स्मात् जातिर्ब्रह्मत्वे हेतुर्नास्ति ३ वर्ण इति चेत् ब्राह्मणः श्वेतवर्णः क्षत्रियः रक्तवर्णः वैश्यः पीतवर्णः शूद्रः
कृष्णवर्णः इति वचनात् सर्वेषामेव ब्राह्मणानां वर्णदर्शनात् तस्मात् ब्राह्मणो नास्ति ४ पांडित्यमिति चेत्
तर्हि क्षत्रियवैश्यशूद्रादयोपि परपदार्थवाक्यप्रमाणविज्ञानवन्तो बहवः संति तस्मात् पांडित्यं ब्राह्मणो न भ
वत्येव ५ धर्म इति चेत् तर्हि क्षत्रियवैश्यशूद्रादयोपि इष्टापूर्त्तिधर्मकारिणो बहवः संति तस्मात् धर्मोपि
न हेतुः ६ धार्मिकत्वमिति चेत् तर्हि क्षत्रियवैश्यशूद्रादयोपि कन्यादान गजदान गोदान हिरण्यदान
महिषीदान दातारो बहवः संति तस्मात् धार्मिकं ब्राह्मणो न भवत्येव ७ कर्मेति चेत् ब्राह्मणः श्वेतवर्णः
[illegible] क्षत्रियस्य स्वधर्मः वैश्यस्य स्वधर्मः शूद्रस्य स्वधर्म इति नियमाभावात् तस्मात् [illegible] के
कापि न हेतुः ८ किं तु कारणं तदा ब्रह्मलक्षणमिव अपृथग्यत्न्य वरोति लक्षणलक्षिता ब्राह्मण तथा कामनाभावाद्दुषादिर

तिकेचित् मद्यमांसस्वादनेरतेः क्रीडाविलासविभ्रमानंदमयोमोक्षइतिकेचित् अस्तिनास्तित्युभयज्ञान
विध्वंसोमोक्षइतिकेचित् सोहंभावसमरसत्वंमोक्षइतिकेचित्स्वात्मानंदबोधमयोमोक्षइतिकेचित्
जटास्थापनंभस्मोद्धूलनंमौनांगीकारादेवमोक्ष इतिकेचित् नानातीर्थयात्राजपहवनस्नानव्रतैरेवमो
क्षइतिकेचित्स्थावरजंगमाजातुत्यहिंसाकेशोत्पाटनात्येवमोक्षइतिकेचित् एतेषांसंकल्पविकल्पा
नुसारेणदर्शनभेदाबहवःसंतितन्नभवंतिसर्वेषांमोक्षपदमिति किंतुयोमहावाक्यविभ्रमेणनोक्तं
समष्टिव्यष्टिरूपोयःप्रपंचःतद्रूढःशाबलंवाच्यंपरित्यज्यलक्ष्यलक्षणमंगीकृत्यपञ्जीवपरमेश्वरयोरैक्यं
सएवमोक्षःकथ्यतेसकथंयथामहाकाशोघटमठाद्युपाधिविघातेतत्स्वरूपंमहाकाशःसिद्धःतथाजीवपर
मेश्वरयोरैक्यंसएवमोक्षः सिद्धान्तप्याहिवेदांतावहुतर्ककर्कशमतिग्रस्ताः परमायया भ्रष्टाः कर्मकांडाकु
लाहंतधियाद्वैतत्तुवैशेषिकाः अन्यभेदरताविवादस्फलाहालसनत्वेतांचिंताहत्समासिद्धमतेस्वभाससनमयंधी
रूपंसंश्रयेत् स्नानानस्वरत्रिवादपरबोमायाधिकाराःतताः सांख्यावेशमवदैदिकाविधिपराःसंन्यासिनःहाशा

नेकाः सौत्रान्तिकवैभाषिकाः प्रपंचनिरता बौद्धाः जिना श्रावकाः एते कष्टरता क्रियापथगतास्ते तत्त्वतो वंचितास्तस्मात् २ शैवाः पशुप
ताः महाव्रतधराः कालामुखाः जंगमाः गाणेशाः सकलेष्टदं गणपतिं ध्यायन्ति वित्ते निष्ठाः शाक्ताः कौलाः कुलाचारवादनि
३ रताः कापालिकाः संभवाः एते न्यस्वतंत्रमंत्रनिरतास्ते तत्त्वतो वंचितास्तस्मात् ३ श्रीचार्याश्चक्रदीक्षिताः कृतरता
स्नानव्रतातपसा नानातीर्थाभिषेककाजपपरा मौनेस्थिता नित्यपूजाः नित्यचान्द्रायणादिना आत्मदमने दत्ताव
धाना एते ते त्वदुःखभारनिरतास्ते तत्त्वतो वंचिताः तस्मात् ४ चार्वाकाः प्रत्यक्षवादिनः स्वर्गनरकविमुखाः देहात्मवा
देरताः सर्वेषां मतिशक्तिर्नु सहपराद्वैतपराज्ञानिकाः कर्मारंभमजानियाजन्मनताभ्येषु येऽभिद्रयास्तेषामादि
कमल्पमेव फलं नैवास्ति मोक्षं परं ५ इदानीं महावाक्यार्थमुखेन बोधः कथ्यते यमनियमादिसाधनसंप
न्नानामधिकारिणाम् अनुग्रहाय अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहाः एते पंच यमाः शौचसंतोषस्वाध्यायतप
ईश्वरप्रणिधानानि नियमाः तत्र महावाक्यं तत्त्वमसि त्वंपदे तत्पदे द्वयमस्ति तत्पदस्य त्वंपदस्य च वाच्यमर्थं ल
क्ष्यमर्थं च कथयामि तत्पदस्य वाच्यार्थो मायोपाधिः सकलजगदुत्पत्तिस्थितिलयकारणरूपत्वात् सर्वज्ञः स
र्वेश्वरत्वात् सर्वशक्तिमान् सर्वकामदः सर्वपरोक्षे ज्ञानमहवर्त्तमानाः इति तत्पदस्य वाच्यार्थः सम्यग्ज्ञानेन मा 3

नंदमद्वितीयं चैतन्यं सत्यं दस्य लक्षणार्थः इति सर्वज्ञः सर्वेश्वरस्यात्मस्वरूपसत्त्वज्ञानमात्रं भवति सर्वकामप्रदोपि न भवतीत्यपरस्त्वेण
सह १ वर्तमानोपि न भवति किं तु केवलं सत्यज्ञानानंदाद्वितीयस्वरूपं चैतन्यमिति तत्त्वपदस्य लक्षणार्थः अर्थत्वंपद
स्य वाच्यार्थः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणपंचज्ञानेंद्रियसहितः वाक्पाणिपादपायूपस्थपंचकर्मेंद्रियसहि
तः प्राणापानव्यानोदानसमानादिदशवायुसहितो मनोबुद्ध्यहंकारचित्तमंतःकरणचतुष्टयसहितः श
ब्दस्पर्शरूपरसगंधविषयवचनादानगमनविसर्गानंदसंकल्पनिश्चयाभिमानानुसंधानात्मकचतुर्दशविष
यसहितः अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयपंचकोशसहितः आधिदैविकाधिभौतिकाध्या
त्मिकतापत्रयसहितः सत्त्रिगुणाः पुत्रवित्तलोकेषणात्रयसहितः कालत्रयसहितोऽशनापिपासाशोक
मोहजरामरणषडूर्मिसहितोऽस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यतीति षड्भावविकारा
न्वितः इति त्वंपदस्य वाच्यार्थः अथ लक्षणार्थोस्य सर्वप्राणिहृदयस्थितमद्वितीयं चैतन्यं त्वंपदस्य लक्ष्यार्थः ए
तत्त्वयुक्तं चैतन्यमेव सत्यज्ञानानंदाद्वितीयचैतन्यमनन्तदेवाहं सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतिः सत्यमित्ये
कं ब्रह्म ज्ञानमित्येकं अनंतमित्येकं किमेतावति ब्रह्माणि सत्यमेकमेवेति स्वप्रकाशः सद्गुरुसत्यवादेन वा

४ धितत्वम् अतोऽन्यानवाहे न जप्रिसत्वमनुचतो ब्रह्मत्वं तत्त्वाहे न प्रसत्वं इत्वमुच्यते ब्रह्मगरोहे न परिपूर्णत्वमुच्यते एकमेवाद्वितीयं
चैतन्यं ब्रह्मेति तत्त्वमसि ब्रह्मैवाहमस्मि इति ज्ञात्वा एवं दुःखं सन्ने कृतकृत्यो भवेत् ब्रह्मैव सन्ब्रह्माप्येति विमुक्तश्च विमुच्यते
इत्यादिश्रुतिभिरेवं ज्ञानिनां [illegible] प्रारब्धकर्मजनितफलावधि लोकानुग्रहं कुर्वन्नेवाव
तिष्ठते ज्ञानानां च सर्वं सर्वात्मत्वं यथाकेवलं मुच्यति विध्वस्ता [illegible] मात्मापि मोहकार्येन बाधितम् [illegible] चापि त्वं चे
त्वं पदः स्वस्वरूपं न मुच्यति [illegible] समयो भवेत् ॥ ॥ इति श्रीशंकराचार्यविरचि
ते [illegible] समाप्तम् ॥ शुभमस्तु ॥ शुभम् ॥ मङ्गलम् ॥ ८॥ ३॥ ॥ ॥ ॥
अथ पञ्चविधनिर्वाचना जातिर्नाम स्वरूपं [illegible] मिति हाचातो ब्राह्मणत्वं [illegible] क्षत्रियो [illegible] वर्णकाः वैश्यास्तु पीतवर्णास्तु शूद्रवर्णास्तु
[illegible] कृष्णवर्णाः [illegible] किं संख्यालकः [illegible] पञ्च [illegible] चकुले नामा [illegible] वेदितं [illegible]
[illegible]
[illegible] पंचविधवः [illegible] नाम [illegible]
[illegible] यथा कालात्या [illegible] दशविधा [illegible]
[illegible] दशमः कालः [illegible]
[illegible] ४

8